श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ सप्ततितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ सप्ततितमः सर्गः ॥

## देवेभ्यो लब्धवरस्य शत्रुघ्नस्य मधुपुरीं निवेश्य ततः श्रीरामपार्श्वे गन्तुं विचारः

हते तु लवणे देवाः सेन्द्राः साग्निपुरोगमाः।
ऊचुः सुमधुरां वाणीं शत्रुघ्नं शत्रुतापनम्॥ 7.70.1 ॥

दिष्ट्या ते विजयो वत्स दिष्ट्या लवणराक्षसः।
हतः पुरुषशार्दूल वरं वरय सुव्रत॥ 7.70.2 ॥

वरदास्तु महाबाहो सर्व एव समागताः।
विजयाकाङ्क्षिणस्तुभ्यममोघं दर्शनं हि नः॥ 7.70.3 ॥

देवानां भाषितं श्रुत्वा शूरो मूर्ध्नि कृताञ्जलिः।
प्रत्युवाच महाबाहुः शत्रुघ्नः प्रयतात्मवान्॥ 7.70.4 ॥

इयं मधुपुरी रम्या मधुरा देवनिर्मिता।
निवेशं प्राप्नुयाच्छीघ्रमेष मेऽस्तु वरः परः॥ 7.70.5 ॥

तं देवाः प्रीतमनसो बाढमित्येव राघवम्।
भविष्यति पुरी रम्या शूरसेना न संशयः॥ 7.70.6 ॥

ते तथोक्त्वा महात्मानो दिवमारुरुहुस्तदा।
शत्रुघ्नोऽपि महातेजास्तां सेनां समुपानयत्॥ 7.70.7 ॥

सा सेना शीघ्रमागच्छच्छ्रुत्वा शत्रुघ्नशासनम्।
निवेशनं च शत्रुघ्नः श्रावणेन समारभत्॥ **7.70.8** ॥

स पुरा दिव्यसङ्काशो वर्षे द्वादशमे शुभे।
निविष्टः शूरसेनानां विषयश्चाकुतोभयः॥ **7.70.9** ॥

क्षेत्राणि सस्ययुक्तानि काले वर्षति वासवः।
अरोगवीरपुरुषा शत्रुघ्नभुजपालिता॥ **7.70.10** ॥

अर्धचन्द्रप्रतीकाशा यमुनातीरशोभिता।
शोभिता गृहमुख्यैश्च चत्वरापणवीथिकैः।
चातुर्वर्ण्यसमायुक्ता नानावाणिज्यशोभिता॥ **7.70.11** ॥

यच्च तेन पुरा शुभ्रं लवणेन कृतं महत्।
तच्छोभयति शत्रुघ्नो नानावर्णोपशोभिताम्॥ **7.70.12** ॥

आरामैश्च विहारैश्च शोभमानां समन्ततः।
शोभितां शोभनीयैश्च तथान्यैर्दैवमानुषैः॥ **7.70.13** ॥

तां पुरीं दिव्यसङ्काशां नानापण्योपशोभिताम्।
नानादेशगतैश्चापि वणिग्भिरुपशोभिताम्॥ **7.70.14** ॥

तां समृद्धां समृद्धार्थः शत्रुघ्नो भरतानुजः।
निरीक्ष्य परमप्रीतः परं हर्षमुपागमत्॥ **7.70.15** ॥

तस्य बुद्धिः समुत्पन्ना निवेश्य मधुरां पुरीम्।
रामपादौ निरीक्षेऽहं वर्षे द्वादश आगते॥ **7.70.16** ॥

ततः सताममरपुरोपमां पुरीं
    निवेश्य वै विविधजनाभिसंवृताम्।

**नराधिपो रघुपतिपाददर्शने**
**दधे मतिं रघुकुलवंशवर्धनः॥ 7.70.17॥**

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे सप्ततितमः सर्गः॥